## कौशल्यकार्मार्याभ्यां च। (१५५/११७९)

कौशल्यकार्मार्यशब्दाभ्यामपत्ये फिञ् प्रत्ययो भवति। [1]इञोऽपवादः। कौशल्यायनिः। कार्मार्यायणिः। परमप्रकृतेरेवायं प्रत्ययः इष्यते, कौशलस्य अपत्यं, कर्मारस्यापत्यम् इति। [2]प्रत्ययसन्नियोगेन तु प्रकृतिरूपं निपात्यते। तथा च स्मृत्यन्तरम्, दगुकोसलकर्मारच्छागवृषाणां युट् वादिष्टस्य (म.भा.२.२६३) इति। दागव्यायनिः। कौसल्यायनिः। [3]कार्मार्यायणिः। छाग्यायनिः। [4]वार्ष्यायणिः॥

## अणो द्व्यचः। (१५६/११८०)

अणन्ताद् द्व्यचः प्रातिपदिकादपत्ये फिञ् प्रत्ययो भवति। इञोऽपवादः। [5]कार्त्रायणिः। [6]हार्त्रायणिः। अणः इति किम्? दाक्षायणः। द्व्यचः इति किम्? औपगविः।

[३९३] [7]त्यदादीनां वा फिञ् वक्तव्यः।

त्यादायनिः, त्यादः। यादायनिः, यादः। तादायनिः, तादः। [8]अणत्र प्राप्तः॥

## उदीचां वृद्धादगोत्रात्। (१५७/११८१)

वृद्धं [9]यच्छब्दरूपम् अगोत्रं, तस्मादपत्ये फिञ् प्रत्ययो भवति उदीचामाचार्याणां मतेन। [10]आम्रगुप्तायनिः। ग्रामरक्षायणिः। कारिशब्दादपि वृद्धादगोत्रात् परत्वादनेनैव[11] भवितव्यम्। नापितायनिः। उदीचामिति किम्? आम्रगुप्तिः। वृद्धादिति किम्? याज्ञदत्तिः। अगोत्रादिति किम्? औपगविः॥

## वाकिनादीनां कुक् च। (१५८/११८२)

वाकिन इत्येवमादिभ्यः [12]शब्देभ्योऽपत्ये फिञ् [13]प्रत्ययो भवति, तत्संनियोगेन [14]चैषां कुगागमः। यदिह वृद्धमगोत्रं शब्दरूपं तस्यागमार्थमेव ग्रहणम्, अन्येषामुभयार्थम्। [15]वाकिनकायनिः। गारेधकायनिः। इञाद्यपवादो योगः। उदीचामित्यधिकारात् पक्षे ते[16]ऽपि भवन्ति। वाकिनिः। गारेधिः।

वाकिन। गारेध। कार्कटच। काक। लङ्का। 'चर्मिवर्मिणोर्नलोपश्च'[17] (ग.सू. ८१)॥

## पुत्रान्तादन्यतरस्याम्। (१५९/११८३)

उदीचां वृद्धात् इति वर्तते। [18]पुत्रान्तमगोत्रम् इति पूर्वेणैव [19]प्रत्ययः सिद्धः, तस्मिन्ननेन कुगागमोऽन्यतरस्यां विधीयते। पुत्रान्तात् प्रातिपदिकात् यः फिञ् प्रत्ययः, तस्मिन् परभूतेऽन्यतरस्यां कुगागमो भवति पुत्रान्तस्य। तेन त्रैरूप्यं सम्पद्यते। गार्गीपुत्रकायणिः, गार्गीपुत्रायणिः, [20]गार्गीपुत्रिः। वात्सीपुत्रकायणिः, [21]वात्सीपुत्रायणिः, वात्सीपुत्रिः॥

---

1. इञोऽपवादः नास्ति फ. 2. प्रत्ययतत्संनियोगेन च ब. फ. 3. नास्ति फ. 4. वार्षायणिः ब. 5. कार्त्रायणिः नास्ति फ. 6. यास्कस्यापत्यं यास्कायनिः। प्रौष्टायनिः। एवं हौत्रायणिः इत्यधिकम् ब. 7. त्यादादीनां – अणत्र प्राप्तः नास्ति फ. 8. अणेव क. 9. प्रातिपदिकम् फ. 10. शालगुप्तायनिः फ. 11. एव नास्ति ब. 12. शब्देभ्यः नास्ति फ. 13. प्रत्ययो नास्ति ब. 14. च तेषां फ. 15. वाकिनस्य अपत्यम् इत्यधिकम् क. 16. इञ् अपि फ. 17. चार्मिकायणिः वार्मिकायणिः इत्यधिकम् फ. 18. वृद्धमगोत्रम् ब. 19. फिञ् इत्यधिकम् फ. 20. गर्गपुत्रिः फ. 21. वात्सीपुत्रायणिः नास्ति फ.